International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 24-26
© 2023 IJSR
www.anantaajournal.com
Received: 12-11-2022
Accepted: 22-12-2022

**नीलाम्बरबाघ**
**सहायकाचार्य,**
**श्रीजगन्नाथसंस्कृत विश्वविद्यालयः. श्रीविहारः, पुरी, ओडिशा, भारत**

Corresponding Author:
**नीलाम्बरबाघ**
**सहायकाचार्य,**
**श्रीजगन्नाथसंस्कृत विश्वविद्यालयः. श्रीविहारः, पुरी, ओडिशा, भारत**

# महाभारत-किरातार्जुनीयमहाकाव्ययोः कथावस्तुगता समता-विषमता च-एकमनुशीलनम्

## नीलाम्बरबाघ

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i1a.1957

प्रस्तावना

अपारेऽस्मिन् काव्यसंसारे प्रजापतिः कविः । यथेच्छं वर्णयति काव्यम् । काव्यस्याधारः ख्यातवृत्तं, कल्पनात्मकं वा भवति । ख्यातवृत्तेषु रामायण-महाभारत-पुराणादयः समायान्ति । ख्यातानि पञ्चमहाकाव्यानि ख्यातवृत्तात्मकानि एव भवन्ति । तेषु महाकाव्येषु किरातार्जुनमहाकाव्यम् अन्यतमं भवति । अस्मिन् महाकाव्ये भगवान् शंकरः किरातवेशेन समागत्य अर्जुनस्य बुद्धिवलादिकं परीक्षति ।अवसरेऽस्मिन् युद्धमपि प्रवर्तते । एतत् कथावस्तु मूलतः महाभारतात् समायातं वर्तते । महाभारते वर्णितं संक्षिप्तं कथावस्तु आधारीकृत्य महाकविभारविः किरातार्जुनमहाकाव्ये विस्तृतरूपं प्रददाति । अस्मिन् महाकाव्ये आहत्य १८ सर्गाः , श्लोकाश्च १०४० सन्ति । महाभारत-किरातार्जुनमहाकाव्ययोः कथावस्तुगता का समता का च विषमता ? इति एषः विषयः अत्र उपस्थाप्यते ।

### *क. महाभारत-किरातार्जुनीययोः कथावस्तुगता समता*

- महाभारते पाण्डवानां द्वैतवनगमनं वर्णितं ,तत्रापि तेषामवस्थानविषयः उक्तः ।[१] तथा किरातार्जुनीये द्वैतवनावस्थितिकथा सूचिताऽस्ति ।[२]
- महाभारते द्रौपद्याः युधिष्ठिरं प्रति संतापपूर्णवचनं वर्णितं दृश्यते ।[३]
- महाकाव्येऽपि एतत् वर्णनमस्ति ।[४]
- युधिष्ठिरेण क्रोधस्य निन्दा क्षमाभावस्य विशेषप्रशंसा च कृताऽस्ति महाभारते ।[५] अत्राऽपि महाकाव्ये सः विषयः वर्तते ।[६]
- महाभारते दुःखेन विदग्धायाः द्रौपद्याः युधिष्ठिरस्य वुद्धेः , धर्मस्य तथा ईश्वरस्योपरि आक्षेपः वर्णितः ।[७] अत्र महाकाव्येऽपि सः विषयः वर्णितः प्रथमसर्गे ।[८]
- महाभारते युधिष्ठिरेण द्रौपद्याक्षेपस्य समाधानप्रदानकृतम् ।[९]
- अत्राऽपि महाकाव्ये द्वितीयसर्गे समाधानं प्रदीयते ।[१०]
- महाभारते पुरुषार्थमङ्गीत्वेन स्वीकृत्य तत् सम्पादयितुं द्रौपद्याः दृढोक्तिः युधिष्ठिरं प्रति ।[११]
- महाकाव्ये किरातार्जुनीयेऽपि एषः विषयः प्रथमसर्गे उक्तोऽस्ति ।[१२]
- **महाभारते धर्मविषयकवाणी तथा नीतिविषयकवाणीं कथयन् प्रतिज्ञापालनरूपधर्मपक्षे स्थित्वा संयमतायाः परिचयं प्रददाति युधिष्ठिरः ।[१५]**
- **किरातार्जुनीयमहाकाव्येऽपि एषः विषयः अस्ति । [१६]**
- किरातार्जुनीयमहाकव्येऽपि एषः विषयः वर्णितः द्वितीयसर्गे ।[१४]

- महाभारते पुरुषार्थस्य प्रशंसापूर्वकं युधिष्ठिरमुत्तेजयति तथा क्षत्रियधर्मानुकुलं युद्धं कर्त्तुं प्रचोदयाति भीमसेनः ।[१३]
- महाभारते दुःखितः भीमसेनः युधिष्ठिरं युद्धार्थं प्रोत्साहयति ।[१७]
- किरातार्जुनीयमहाकाव्येऽपि एषः विषयः अस्ति ।[१८]
- महाभारते युधिष्ठिरस्य भीमसेनं प्रति वोधनात्मकं कथनम्, व्यासदेवस्य आगमनम् ,उपदेशप्रदानं च वर्णितमस्ति ।[१९]
- किरातार्जुनीयमहाकाव्ये एषः विषयः द्वितीये , तृतीये च सर्गेऽस्ति ।[२०]
- महाभारते सर्वेभ्यः भ्रातृभिः सह मिलित्वा तदनन्तरं इन्द्रकीलगिरिं प्रति तपः साधनाय अर्जुनस्य गमनं तथा च इन्द्रदर्शनं वर्णितमस्ति ।[२१]
- किरातार्जुनीयमहाकाव्ये तृतीयसर्गात् आरभ्य एकादशसर्गं यावत् विषयोऽयं वर्णितोऽस्ति ।[२२]
- भगवतः शङ्करस्य अर्जुनेन साकं युद्धं, अर्जुनस्योपरि भगवतः शङ्करस्य प्रसन्नता तथा अर्जुनस्य भगवतः शङ्करस्य स्तुतिः वर्णिताऽस्ति महाभारते ।[२३]

भगवतः शङ्करस्य अर्जुनाय वरप्रदानं , भगवतः शङ्करस्य स्वधामप्रस्थानं च वर्णितं दृश्यते ।[२४]

अर्जुनस्य समीपं दिक्पालानामागमनम् , तस्मै दिव्यास्त्रप्रदानं वर्णितमस्ति ।[२५]

किरातार्जुनीयमहाकाव्येऽपि एते विषयाः पञ्चदशसर्गात् आरभ्य अष्टादशसर्गाभ्यन्तरे सन्ति ।

## विषमता

- .महाभारते पाण्डवानां द्वैतवनगमनं वर्णितं, तत्र पाण्डवानां वहुभिः ब्राह्मणैः सह द्वैतवनप्रवेशः वर्णितः अस्ति ।[२६]
- किरातार्जुनीयमहाकाव्ये तु केवलं द्वैतवने वसतां पाण्डवानां वर्णना भवति ।[२७] किन्तु तत्र ब्राह्मणानां कथा नास्ति । इति एका विषमता ।
- अत्र महाकाव्ये कश्चित् वनेचरः दूतरुपेण नियुक्तः भवति किन्तु दूतरुपवनेचरनियुक्तिकथा महाभारते नास्ति । इति अपरा एका विषमता । महाभारते वर्ण्यते यत् महर्षिमार्कण्डेयः आगत्य पाण्डवेभ्यः उपदेशं प्रदत्तवान् इति ।[२८] कथेयं महाकाव्ये नास्ति । इयमपि एका विषमता ।
- महाभारते दल्भपुत्रवक्काद्वारा युधिष्ठिराय ब्राह्मणानां महत्त्वकथनं वर्णितमस्ति ।[२९] किरातार्जुनीयमहाकाव्ये नास्ति ईदृशः विषयः ।इयमपि एका विषमता ।
- महाभारते द्रौपदीद्वारा प्रह्लाद-वलि संवादः उक्तोऽस्ति ।[३०] किन्तु एवंभूतः कश्चित् संवादः द्रौपदीवचने नास्ति किरातार्जुनीये ।
- महाभारते शरत्ऋतुवर्णना नास्ति ।किन्तु महाकाव्ये सा वर्णनाऽस्ति ।[३१] इयमपि विषमता ।
- महाभारते हिमालयवर्णना नास्ति । किन्तु महाकाव्ये हिमालयवर्णना विद्यते ।[३२]
- महाभारते अर्जुनस्य तपोभङ्गाय इन्द्रकृतम् अप्सरसां प्रेषणं नास्ति किन्तु किरातार्जुनीये अर्जुनस्य तपः परीक्षणार्थम् इन्द्रप्रेषितानाम् अप्सरसामागमनं चारुतया वर्णितमस्ति ।[३३]
- महाभारते युधिष्ठिराय प्रतिस्मृतिविद्याप्रदानं करोति व्यासदेवः ।[३४] किन्तु महाकाव्ये विद्याप्रदानं वर्णितमस्ति "प्रतिस्मृतिविद्या" इति न । तत् पुनः अर्जुनाय दीयते न तु युधिष्ठिराय ।इयमपि अपरा विषमता ।
- महाभारते अर्जुनस्य उग्रतपस्या तत् विषये ऋषिणां भगवतः शङ्करेण सह वार्त्तालापश्चेति कथावस्तु केवलं महाभारते अस्ति ।[३५] किन्तु महाकाव्ये वनेचराः गत्वा अर्जुनस्य उग्रतपस्याविषये देवराजं सूचितवन्तः ।[३६] इति कथा नास्ति ।
- महाभारते भगवान् शङ्करः अर्जुनाय पाशुपातास्त्रं प्रददाति, तदनन्तरं स्वधाम गच्छति । तदनन्तरमन्ये दिग्पालाः आगत्य अर्जुनाय दिव्यास्त्राणि प्रददाति । तत्र देवराजइन्द्रः स्वर्गं गन्तुमर्जुनम् आदिशति ।[३७] किन्तु किरातार्जुनीयवर्णनायां वर्त्तते यत् शङ्करस्य पाशुपातास्त्रप्रदानन्तरं इन्द्रादि दिक्पालाः अपि अस्त्राणि प्रददति शङ्करस्य आदेशेन । तदनन्तरं शङ्करः आशिर्वादं ददाति, कथयति गृहं गच्छ, शत्रुं च जय इत्यादि ।तदनन्तरं शिवः अन्तर्हितः भवति, अर्जुनश्च गृहं गत्वा युधिष्ठिरेण सह मिलितवान् ।[३८] इति वर्णना अस्ति । एषाऽपि अपरा विषमता ।

## *उपसंहार*

"महाकवयः प्रजापतयः भवन्ति काव्ये" इति निर्विवादः विषयोऽयं । महाकवि भारविः प्रस्तुते महाकाव्ये संक्षिप्तं महाभारतगतं कथावस्तु स्वीकृत्य विशालकायं किरातार्जुनीयमहाकाव्यं कथं रचयति ? कथं वा वर्णयति ? इति सुधियाः प्रमाणानि ।

## सहायकग्रन्था


1. महाभारतम् ।
2. किरातार्जुनीयम् ।


## संदर्भ

1. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व २४/१२-१६
2. किरातार्जुनीयम् १/१
3. महाभारत/ वनपर्व /अर्जुनाभिगमपर्व २७/३-४०
4. किरातार्जुनीयम् /१/२८-४५
5. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३३/२-२२
6. किरातार्जुनीयम् /२/३०-४३
7. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३०/१-४३
8. किरातार्जुनीयम् /१/२८-४५
9. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३१/१-४२
10. किरातार्जुनीयम् /२/३०-५३
11. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३२/१-६३
12. किरातार्जुनीयम् /१/३०-३३
13. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३३/१-९
14. किरातार्जुनीयम् /२/६-२३
15. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३४/२-२२
16. किरातार्जुनीयम् २/२५-५४
17. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व /३५/१-३५
18. किरातार्जुनीयम् २/१-२४
19. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व ३५/१-३५
20. किरातार्जुनीयम् / सर्ग२-३
21. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व ३७/१-३७
22. किरातार्जुनीयम् / सर्ग३-११
23. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व ३९/१-८४
24. तत्रैव ४०/१-२८

25. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व ४१/१-४९
26. तत्रैव २४/१-२६
27. तत्रैव २५/१-१९
28. तत्रैव २५/१-१९
29. तत्रैव २६/१-२५
30. तत्रैव २८/१-३६
31. किरातार्जुनीयम् ४/१-३८
32. तत्रैव ५/१-४८
33. तत्रैव ७/१-४०
34. महाभारतम् /वनपर्व / अर्जुनाभिगमपर्व ३७/३०
35. तत्रैव ३८/१-३५
36. किरातार्जुनीयम् ६/२९-३८
37. महाभारतम् /वनपर्व / कैरातपर्व ४१/१-४९
38. किरातार्जुनीयम् १८/४६-४८